## नलोपाख्यानम्

## 17

सुदेव उवाच।

विदर्भराजो धर्मात्मा भीमो भीमपराक्रमः।

सुतेयं तस्य कल्याणी दमयन्तीति विश्रुता॥ ३-६६-१ ॥

राजा तु नैषधो नाम वीरसेनसुतो नलः।

भार्येयं तस्य कल्याणी पुण्यश्लोकस्य धीमतः॥ ३-६६-२ ॥

स वै द्यूते जितो भ्रात्रा हृतराज्यो महीपतिः।

दमयन्त्या गतः सार्धं न प्राज्ञायत कर्हिचित्॥ ३-६६-३ ॥

ते वयं दमयन्त्यर्थे चरामः पृथिवीमिमाम्।

सेयमासादिता बाला तव पुत्रनिवेशने॥ ३-६६-४॥

अस्या रूपेण सदृशी मानुषी नेह विद्यते।

अस्याश्चैव भ्रुवोर्मध्ये सहजः पिप्लुरुत्तमः।

श्यामायाः पद्मसंकाशो लक्षितो ऽन्तर्हितो मया॥ ३-६६-५॥

piplu *m* – родинка;

मलेन संवृतो ह्यस्यास्तन्वभ्रेणेव चन्द्रमाः।

चिह्नभूतो विभूत्यर्थमयं धात्रा विनिर्मितः॥ ३-६६-६ ॥

प्रतिपत्कलुषेवेन्दोर्लेखा नाति विराजते।

न चास्या नश्यते रूपं वपुर्मलसमाचितम्।

असंस्कृतमपि व्यक्तं भाति काञ्चनसंनिभम्॥ ३-६६-७॥

pratipad *f* – первый день светлой или темной половины лунного месяца;
kaluṣa – грязный, неопрятный;
lekhā *f* – линия, черта;

अनेन वपुषा बाला पिप्लुनानेन चैव ह।

लक्षितेयं मया देवी पिहितो ऽग्निरिवोष्मणा॥ ३-६६-८॥

बृहदश्व उवाच।

तच्छ्रुत्वा वचनं तस्य सुदेवस्य विशां पते।

सुनन्दा शोधयामास पिप्लुप्रच्छादनं मलम्॥ ३-६६-९॥

स मलेनापकृष्टेन पिप्लुस्तस्या व्यरोचत।

दमयन्त्यास्तदा व्यभ्रे नभसीव निशाकरः॥ ३-६६-१०॥

पिप्लुं दृष्ट्वा सुनन्दा च राजमाता च भारत।

रुदन्त्यौ तां परिष्वज्य मुहूर्तमिव तस्थतुः।
उत्सृज्य बाष्पं शनकै राजमातेदमब्रवीत्॥ ३-६६-११॥
भगिन्या दुहिता मे ऽसि पिप्लुनानेन सूचिता।
अहं च तव माता च राजन्यस्य महात्मनः।
सुते दशार्णाधिपतेः सुदाम्नश्चारुदर्शने॥ ३-६६-१२॥
भीमस्य राज्ञः सा दत्ता वीरबाहोरहं पुनः।
त्वं तु जाता मया दृष्टा दशार्णेषु पितुर्गृहे॥ ३-६६-१३॥
यथैव ते पितुर्गेहं तथेदमपि भामिनि।
यथैव हि ममैश्वर्यं दमयन्ति तथा तव॥ ३-६६-१४॥
तां प्रहृष्टेन मनसा दमयन्ती विशां पते।
प्रणम्य मातुर्भगिनीमिदं वचनमब्रवीत्॥ ३-६६-१५॥
अज्ञायमानापि सती सुखमस्म्युषितेह वै।
सर्वकामैः सुविहिता रक्ष्यमाणा सदा त्वया॥ ३-६६-१६॥
सुखात्सुखतरो वासो भविष्यति न संशयः।
चिरविप्रोषितां मातर्मामनुज्ञातुमर्हसि॥ ३-६६-१७॥
दारकौ च हि मे नीतौ वसतस्तत्र बालकौ।
पित्रा विहीनौ शोकार्तौ मया चैव कथं नु तौ॥ ३-६६-१८॥
यदि चापि प्रियं किं चिन्मयि कर्तुमिहेच्छसि।
विदर्भान्यातुमिच्छामि शीघ्रं मे यानमादिश॥ ३-६६-१९॥
बाढमित्येव तामुक्त्वा हृष्टा मातृष्वसा नृप।
गुप्तां बलेन महता पुत्रस्यानुमते ततः॥ ३-६६-२०॥
प्रस्थापयद्राजमाता श्रीमता नरवाहिना।
यानेन भरतश्रेष्ठ स्वन्नपानपरिच्छदाम्॥ ३-६६-२१॥
ततः सा नचिरादेव विदर्भानगमच्छुभा।
तां तु बन्धुजनः सर्वः प्रहृष्टः प्रत्यपूजयत्॥ ३-६६-२२॥
सर्वान्कुशलिनो दृष्ट्वा बान्धवान्दारकौ च तौ।
मातरं पितरं चैव सर्वं चैव सखीजनम्॥ ३-६६-२३॥
देवताः पूजयामास ब्राह्मणांश्च यशस्विनी।
विधिना परेण कल्याणी दमयन्ती विशां पते॥ ३-६६-२४॥
अतर्पयत्सुदेवं च गोसहस्रेण पार्थिवः।

प्रीतो दृष्ट्वैव तनयां ग्रामेण द्रविणेन च॥ ३-६६-२५॥
सा व्युष्टा रजनीं तत्र पितुर्वेश्मनि भामिनी।
विश्रान्ता मातरं राजन्निदं वचनमब्रवीत्॥ ३-६६-२६॥